MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

वेङ्कामात्यस्य लक्ष्मीस्वयम्वरसमवकारः

Dr. Subhankar Basak
Assistant Professor
Dept. of Sanskrit, Kulti College,
Kulti, West Bengal

शोधसारः

शोधपत्रेऽस्मिन् मान्यवरश्रीवेङ्कामात्यकृतसमवकारान्तर्गतस्य लक्ष्मीस्वयम्वराख्यस्य नाट्यस्य विशिष्टाध्ययनम्। शोधपत्रस्यामुष्यावगमनसौविध्यर्थं बिन्दुशः विषयाः विभज्य विमर्शिताः। तत्रादौ प्रणेतुर्जीवनपरिचयः उल्लिखितः। समनन्तरञ्च तदीयकृतयः प्रस्तुताः। ततश्च समवकारवैशिष्ट्यान्यालोचितानि। तदनन्तरन्नाटकस्थपात्राणां समीक्षणं कृतम्। अनन्तरञ्च नाटकस्य मुख्यविषयाधीनस्य रसचित्रणस्य परीक्षणं विहितम्। ततश्च नाटकस्थस्य **"विच्छेदे सति प्रेम"** इति भावस्य विश्लेषणमक्रियत। तदनन्तरं समग्रनाटकपरिशीलनदृष्टया नाटकस्य गुणाः दोषाश्च समालोचिताः। एवं शोधपत्रमिदं पर्यवसितम्।

तत्राद्यभागे सामाजिकराजनैतिककर्मकुशलः कन्नडसंस्कृतसाहित्ये कृतभूरिपरिश्रमः राजकार्येषु सम्प्राप्तविविधोपाधिः वेङ्कामात्यः आसीदिति वर्ण्यते। कृतिरूपेण तेन कृतालङ्कारमणिदर्पणकामविलासभाणादि बहूनि संस्कृतनिष्ठशास्त्राणीति परं विवक्ष्यते। समवकाररीतिमनुसृत्योपस्थापिते लक्ष्मीस्वयम्वरे कथं पुराणादिशास्त्रेभ्यः प्रसङ्गाः सङ्गृहीताः, मुख्यसरत्वेन वीररसः, समवकारस्य सर्वे नियमाश्च कथमिह पालिताः इति आलोचिम्। त्रिभिरङ्कैरिदन्नाटं प्रस्तूयते। प्रथमाङ्के रमामाधवयोः प्रेमविषयकद्वन्द्वः द्वितीये तयोर्वियोगः तृतीये च स्वयम्वरमुखेन विवाहः। वैनतेयनारदादिविविधदैवचरितैरिदन्नाटकं सुसङ्गठितम्। कथं सर्वाण्यपि चित्रितानि पात्राणि यथार्थतामलभन्त नाटके इत्यपि विचारितम्। वीररसपूर्णे नाटकेस्मिन् कथं क्वचिच्छृङ्गाररसः

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

प्राधान्यमगादिति समालोच्य आधिक्येन विद्यन्ते अत्र प्रशंसनीयाः अंशाः इति विद्वज्जननितरां श्लाघ्येयं कृतिरिति विचारितम्। इति शिवम्।

कूटशब्दः – समवकारः, रसः, विच्छेदः।

रक्षितं हि अष्टादशशतके कर्णाटकीयैस्समृद्धं संस्कृतस्यैतिह्यम्। तदानीन्तनकाले साहित्यस्योत्कर्षाय उदारतया अवदत्तेष्ववदानेषु वेङ्कामात्यवर्याणामवदानं मूर्धण्यतामभजत्। विहितेष्वपि तेन संस्कृतक्षेत्रे कन्नडभाषायां च बहूषु कार्येषु परिलक्ष्यते संस्कृते एव तस्याधिका रुचिः।

वेङ्काप्पैया इति नाम्नापि प्रसिद्धः वेङ्कामात्यः वामम्बायाः रमापूरी-हंपयामात्ययोश्च सूनुर्बभूव[1]। तत्पितृनाम्नैतज्ज्ञायते यत्सः मन्त्रिपरिवारसदस्यः आस। एतदपि प्रसिद्धिर्विद्यते यत्सः ब्राह्मणेषु अरुवेलीनियोगिसांप्रदायान्तर्गतोऽवर्तत[2]। तस्य अनन्तरकालिकसाहित्यकृतीः दृष्ट्वैतद् अवबुध्यते यच्छिक्षाप्राप्तेः प्रारम्भलग्ने कलासाहित्यविषययोश्च तैरुत्तमं ज्ञानं लेभे। वेङ्कासूरिः[3] वेङ्कटभूपतिः[4] चेत्यादिभिः नामान्तरैरपि सः स्वदेशीयानां समीपे परिचितोऽभूत्। ऐतिहासिकतथ्यादिदं ज्ञायते यत्पञ्चसप्तत्यधिकसप्तदशशततमेशवीयाब्दस्य उपसमयं सः कर्णाटकीयायाः वीराम्माजीराज्ञः सेवायां निरत आसीत्, अपि च आधिकारिकरूपेण दक्षिणकानारायाः होसांगडीनामके कस्मिंश्चित्स्थाने नियुक्तोऽभूत्, तच्च स्थानं तदानीन्तने बेदनूरनामकस्थानान्तर्भुक्तं जगाम। वेङ्कामात्यस्य जीवनं वीराम्माजीराज्ञः मैसुरूनगरस्य हैदरआलिराज्ञः च राजनैतिककार्यादिभिरोतप्रोततया सम्बद्धमासीत्। अनन्तरं हैदर-आलिः स्वस्य प्राशासनिककार्यस्य उन्नतये वेङ्कामात्यं दीवान-इति पदं समारुह्य प्रधान-इति उपाधिना अभूषयत्। तस्य प्रारम्भिकवत्सराणि वीराम्माजीराज्ञः सेवाकार्ये समर्पितानि, अपि चेदम् अनुमीयते यत् तस्मिन् समये एव सः संस्कृतरचनोत्पादने अधिक्येन मनोनिवेशम् अकरोदिति।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

वेङ्कामात्यः उच्चस्तरीयो राजनीतिज्ञोऽभूत्। विशिष्टादेतस्मात्कारणादेव हैदरआलिराजा तं स्वायत्तीकृत्वा तस्मै श्रीरङ्गपतम्-नामकस्थालस्य प्रधानकार्यभारं समर्पयाञ्चकार। तत्प्राशासनिककार्यमपि राजनैतिकज्ञानवत् उत्तममासीत्। हैदर-आलिराज्ञः अनुरोधानुसारेण सः बेदनूरनामकस्थानस्य प्राशासनिककार्यम् अग्रहीत्, जनानां विश्वासम् अजैषीत्, व्यापारवाणिज्ययोश्च उन्नतये अनेकविधं कार्यं व्यधात्। मौद्रिककदाचारं परीक्ष्य तन्न्यूनीकृत्य तेन राजस्वस्य वृद्धिर्विहिता। मैसुरूनगरस्य थिम्मप्पानामकेन केनचित् आधिकारिकेण कृतः परसम्पत्तेः अव्यवहारः विशेषतया तेन परिलक्षितः। वेङ्कामात्यश्चतुरः वार्ताकारोऽपि बभूव। चतुःसप्तत्युत्तरसप्तदशशततमेशवीयाब्दे महाराष्ट्रियाधिनाथेन रघुनाथरावेण साकं शान्तिसन्धये वार्तालापाय वैङ्कप्पैयानामकस्य प्रधानस्य नेतृत्त्वाधीनः एको विशेषजनसमूहः हैदर-आलिराज्ञा पूनामध्ये अप्रेष्यत। तत्र एकेन नागरिकप्रशासकरूपेण उपोस्थितस्य तस्य प्रतिभायाः महती प्रशंसा कृता, आहवे च तत्कौशलः कथञ्चिदपि अगण्यो नाभूत्। सप्तत्यधिकसप्तदशशततमेशवीयाब्दे हस्सनबेलूरप्रभृतिस्थलेषु पालगारैः प्रवृत्तस्य कस्यचित् विद्रोहस्य दमनाय प्रेषितेन तेन वैङ्कप्पैयाप्रधानेन तत्कार्यं सफलतापूर्वकं व्यधात्। एतस्मादपि रोचकतमं वृत्तान्तम् इदमस्ति यत् एकसप्तत्यधिकसप्तदशशततमेशवीयाब्दे मेलकोटसमीपे महाराष्ट्रियैः सह युद्धं कृत्वा विजयं प्राप्य स्वं टीपूराजानं च मैसुरूक्षेत्रं प्रति सफलतापूर्वकम् अनयत्।

वेङ्कामात्येन सुखपूर्वकं जीवनमान्तपर्यन्तन्नोपबुभुजे। तस्यान्तिमदिनानि प्रारम्भिकदिनगतसुखाद्विपरीतम् आसीत्। विहितेऽपि निष्ठापूर्वकं सेवने हैदर-आलिराज्ञा तेन सह मैत्री नाचरिता, अपि तु वेङ्कामात्यस्योपरि सत्तादुरुपयोगस्य राजस्वग्रहणे असामर्थ्यस्य च आरोपं लेपयित्वा सम्पर्कः नाशितः। शासकैस्तदीयमधिकाधिकं धनं स्व्यीयकरोच्छ्रीरङ्गपतमिति-नामकस्थाने कारागारं प्रति प्रेषितश्च। तत्र च एकं उत्तमं तत्त्वमिदमासीद्यदप्पाजीरमानामकस्य कस्यचित् आधिकारिकस्य मध्यस्थतया साहाय्येन च वेङ्कामात्याय मुक्तये अनुमतिः, प्रधानस्य उपाधिः, प्रतिमासमेकसहस्ररूप्यकाणि च भाटकत्वेन प्रदानाय निर्देशः प्रदत्तः। द्व्यशीत्यधिकसप्तदशशततमेशवीयाब्दे मधुमेहेनाक्रान्तः सन् सः पञ्चत्वमवाप।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

वेङ्कामात्यस्य जीवनविषये अधिकवृत्तान्तो नैवोपलभ्यते। तद्विषये अन्यः कश्चित् ज्ञातव्यो लघुबिन्दुस्तावदस्ति यत्सः एकसप्तत्यधिकसप्तदशशततमेशवीयाब्दे द्वितीयमुद्वाहञ्चकार। लक्ष्मीस्वयम्वरनाटकस्य प्रारंभिकभागे इदमुक्तं यदेतस्य लेखकस्य नाम वेङ्कसूरिः वेङ्कयार्रयो वास्ति। सः एकः सुप्रसिद्धकविः आसीत्। बहुभाषाविदा तेन भैक्षवनामकमेकं प्रहसनमपि व्यरचि। ध्यातव्योऽयं स्पष्टो विषयो यन्नगरे उत्सवावसरे तस्य नाटकीयरचनायाः लेखनस्याभ्यासः आसीदिति। इदं श्रूयते यल्लक्ष्मीस्वयंवरसमवकारस्य रचनां श्रीरमापुरनामके स्थाने रघुनाथमहोत्सवस्यावसरे एकत्रितानां जनानां मनोरञ्जनाय कृतमासीदिति। अस्मिन् समवकारे अन्येषां नाटकानां भूमिकाभागे च तेन श्रीरमाचन्द्रस्य स्तुतिर्विहिता, एतदाधारेण तु इदं वक्तुमेव शक्यते यत्सः भगवतः श्रीरमाचन्द्रस्य उत्तमो भक्तो बभूव[5]।

वेङ्कामात्यः अनेकसंख्यकानां संस्कृतकृतीनां रचयिता आसीत्। तेषु अन्यतमास्तावत्– अलङ्कारमणिदर्पणम्, कामविलासभाणः, महेन्द्रविजयडिमः, वीरराघवीयव्यायोगः, लक्ष्मीस्वयंवरसमवकारः, सीताकल्याणवीथिः, रुक्मिणीस्वयंवरांकः, हनुमज्जयम्, रमाकथामृतसारः[6] चेति। एतद्व्यतिरिच्यापि तेन विरचिताः अन्ये ग्रन्थाः तावत् - कुक्षिंभरिभभैक्षवः – एकं प्रहसनम्, अपि च उर्वशीसार्वभौमः – एकः इहामृगः[7] चेति। अनेनेदं ज्ञायते नाट्यरचनायाः प्रत्येकं वैविध्यस्य चित्रणमेव लेखकस्य मनोरथ आसीत्।

नाट्यविधासु समवकारप्रकारेण लक्ष्मीस्वयंवर इति ग्रन्थः प्रणीतः। नाटकस्येतत्प्रजातेः विशिष्टविषयाः नाट्यशास्त्रस्य विषयैः सह व्याख्यासन्दर्भे भिन्नालङ्कारग्रन्थेषु उल्लिखिताः। साहित्यदर्पणे समवकारस्य व्याख्यानरूपेण समुद्रमथनस्य उदाहरणमुपस्थापितम्, यन्नाट्यलेखनस्य विशिष्टः प्रकारः। लक्षणग्रन्थेभ्यः अस्माभिरेतज्ज्ञायते यत्समवकारस्य कथानकं देवानां दानवानां च कथया अनुस्यूतं भवेत्, अपि च सा कथा सुस्थापिथापि भवेत्। समवकारस्य नायकः प्रसिद्धव्यक्तिः भवेत्, अपि च सः उदात्तस्वभावः भवेत्। मुख्यरसः वीरः भवेत् अन्ये च रसाः उचितरूपेण चित्रिताः भवेयुः। समवकारः विमर्शसन्धिं विना प्रस्तावनया भूमिकया वा सह अग्रेसरः भवेत्। अत्र समस्तनाट्यवृत्तीनां प्रयोगः समानरूपेण प्रदर्शनीयः अपि च कैशिकीवृत्तेः प्रयोगः

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

विरलतया कर्तव्यः। बिन्दुः प्रवेशिका च स्वं न अवबोधयेत्, अपि च नाटकं त्रिभिः अङ्कैः युक्तं भवेत्। लेखकस्य समयावधानमावश्यकम्।अपि च षट्त्रिंशघटिकाभिः नाटकं समापनीयम्। विरोधिभिः कृतस्य कपटस्य कासाञ्चन गभीरापदां च सन्दर्भोऽपि भवेत्। सर्वोपरि, त्रिविधप्रेमसु एकप्रकारकस्य प्रेम्णः चित्रणमपि भवेत्तानि प्रेमप्रकाराणि धर्मप्रकारकः (धर्मशृङ्गारः), अर्थप्रकारकः (अर्थशृङ्गारः), सुखप्रकारकः (कामशृङ्गारः) चेति। अपि च एतच्छ्लोकाः भिन्नछन्दस्सु रचिताः स्युः।

लक्ष्मीस्वयम्वरे नाट्यशास्त्रेण निर्धारिताः सर्वेऽपि विशेषेणावधेयांशाः पूर्णतया परिपालिताः। इदमेकं प्रमुखरचनं यत्रत्यं कथानकं लक्ष्मीमाधवयोः विवाहस्य प्रसिद्धं प्रसङ्गम् आश्रित्य लिखितम्। कथानके उपस्थितानि पात्राणि देवताः राक्षसाः च। अस्य नायकः पुरुषोत्तमः यः अत्र माधवेन प्रसिद्धः, अपि च सः नायकस्य सर्वोच्चप्रकारेण धीरोदात्तरूपेण वर्णितः। तस्य प्रयासः लक्ष्म्याः स्नेहं हस्तं च प्रति निर्देशितम् (फलप्राप्तिः)। लक्ष्मी च अत्र रामी इति नाम्ना प्रसिद्धा। अत्र मुख्यरसः वीरः अपि च रमास्य माधवस्य च आचरणेन ज्ञायते यत् अत्र शृङ्गारोऽपि सहायकरसेन प्रस्फुटितः, इतोऽपि विदूषकस्य वैनतेयस्य च आचरणेन हास्यरसोऽपि प्रस्फुटितः। एतस्य नाटकस्य अध्ययनेन स्फुटं ज्ञायते यद् विमर्शसन्धिं व्यतिरिच्य अत्र सर्वेऽपि अन्यसन्धयः सन्ति अपि च एका रुचिकरी प्रस्तावनापि विद्यते। कैशिकीवृत्तिं व्यतिरिच्य अत्र सर्वाः अपि नाट्यवृत्तयः सन्ति। अस्य चायं विशेषो यदत्र बिन्दुप्रवेशकयोरभावोऽपि वर्तते। अत्र अङ्कत्रयमेव विद्यते अपि च नायिकानायिकयोः प्रेमविवादस्य (प्रणयकाले) तदनन्तरसमाधानस्य च समये समयस्य संक्षिप्तापि दृश्यते। अत्र देवतावेशधारिणः कस्यचित् कपटिनः उल्लेखोऽपि अस्ति, यस्य उद्देश्यम् आसीत् विवाहमण्डपात् रमास्य नयनम्। यदि संयोगाद्दैत्याः स्वोद्देश्ये सफलाः अभविष्यन् तर्हि वैनतेयेन कृतानां विपत्तीनाम् (उपद्रवाणाम्) अपि सन्दर्भस्य उल्लेखः अपि प्राप्यते अत्र। समवकारस्य कृतेषु निर्दिष्टेषु त्रिषु प्रेमसु (शृङ्गारेषु) लक्ष्मीस्वयंवरे धर्मशृङ्गारः चित्रितः। माधवः ब्रह्माण्डस्य कल्याणाय देवतानां प्रसन्नतायै च रमां परिणीतवान्।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

वेङ्कामात्यप्रणीतलक्ष्मीस्वयम्वरसमवकारस्य नाटकस्य विषयवस्तु त्रिधा विभज्यते। प्रथमाङ्के प्रेमविषयकद्वन्द्वः (प्रणयकलहः), द्वितीयाङ्के रमामाधवयोः वियोगः (रमामाधवविरहः), तृतीयाङ्के च रमामाधवयोः विवाहः।

प्रथमाङ्कस्य प्रारम्भः श्रीरामस्तुतिपरकेन एकेन गद्यांशेन भवति। ततः सूत्रधारेण स्वपत्न्या कथोपकथनेन एक प्रस्तावना आरच्यते। नाटकस्य अस्मिन् अंशे लेखकैः दर्शकेभ्यः नाटकनाम्नः लेखकनाम्नः यस्मिन्नवसरे मञ्चनं क्रियते तत्सर्वमपि वक्ष्यते। नाट्यशास्त्रस्य नियमपरिपालनाय प्रस्तावनापि अस्मिन्नंशे दृश्यते। यन्मुख्यनाटकस्य विषयः विवाहः अपि च नाटके प्रेम्णो भावना, सूत्रधारस्य तत्पत्न्याश्च पुत्र्याः शृङ्गारलक्ष्म्याः सन्दर्भेण सुयोग्यवरेण विवाहोत्तरं विवाहोत्सवपरिपालनचिन्ता च। सुन्दरः श्रीरङ्गबल्लभः तत्र तां परिणेतुं स्थित आसीत् इत्युक्त्वा सूत्रधारेण तदीयक्रोधः उपशामितः। प्रस्तावनानन्तरं कुवलयानन्दमल्लिकाशेखरनामानौ द्वौ गन्धर्वौ मञ्चं प्रविशतः। तैभ्यामेकत्र शुद्धविष्कम्भके कथोपकथनेन उद्यते यद् रमा तत्पतिना प्रेमविवादं कृत्वा स्वपितरमुपससार, ततः तत्पित्रा अनिर्णयत यत्स्वयम्वरसभामेकां समायोज्य तस्याः परिणयः एकेन लोकवीरेण सकलगुणपूर्णेन च साधयिष्यते। ताभ्यां तयोः संवादे एतदपि आख्याप्यत यद् दिग्देवतया सह अन्या अपि बहुदेवताः स्वयम्वरं प्रति समागताः, केचन अन्यदेवाः श्रीमाधवस्य आशीषं प्राप्तये समुपेताः तदानीं च वैनतेयेन सह प्रेमबिह्वलावस्थायां प्राविशन। ततस्तौ रमायाः पतिप्राप्तये उपायान् अर्थान् च आलोचयताम्। एतयोर्निर्गमनानन्तरं एकः प्रतिहारी मञ्चं विशति। सः देवर्षिणा नारदेन वरुणस्य नगरे आयोजितां स्वयंवरसभां विवृणोति। नारदश्च दैत्यानामपि स्वयंवरसभायां भागग्रहणस्य छलेन च रमापहरणस्य विषयं न्यवेदयत्। ततस्तेन माधवः दैत्यैः सह युद्धाय वरुणस्य नगरं गमनाय च उपदिष्टः। माधवेनापि तथैवाचर्यते।

द्वितीयाङ्कस्य प्रारम्भः एकस्याः कञ्चुकीप्रवेशेन प्रारब्धः। तया मिश्रविष्कम्भके रमायाः मनोरञ्जनीनामिकया सख्या सह साक्षात्क्रियते। तयोः कथोपकथनादेतज्ज्ञातुं शक्यते यत् रमायाः मनः केवलं माधवे एव लग्नमस्ति किञ्च सा माधवेन सहैव विवाहं काङ्क्षते। ततः रमया स्वमात्रा सखीभिः च सह मञ्चं प्रविश्यते। इमाः विवाहस्थलं

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

प्रति यान्ति, ततः वैतालिकस्य विदूषकस्य च प्रवेशादनु मञ्चान्निष्क्रामन्ति। प्रेमिभिः सह रमायाः परिचयार्थम् अधिकप्रियस्य प्रेमिकस्य चयनाय च तौ वरुणेन आदिदेशतुः। तावत् ताभ्यामेतत्समाचरितवन्तौ यावद् रमा माधवं नोपगता गच्छति, यं सा अधिकतया प्रीणाति स्म।

तृतीयः अङ्कः तु विवाहोत्सवस्य उद्यापनार्थं प्रस्तूयते। प्रथमं प्रतिहारी प्रविशति। तदनु वरुणादयः अन्ये देवाः प्रवशन्ति, शिवोऽपि तेषु वर्तते। ते सर्वे आनन्दोत्सवमिममुपलक्ष्य परस्परं शुभेच्छादिविनमयं कुर्वते। अपि च रमामाधवयोः दिव्यविवाहस्य साक्षिणो भवितुं ते सर्वे सन्नद्धाः बभूवुः। सर्वे देवाः माधवमभिनन्दन्ति प्रभोश्च अनुग्रहमपि लभन्ते। रमामाधवौ च पुरातनकलहादिकं विस्मृत्य, तयोः पुनर्मिलनेन सुखिनौ भवताम्। वरुणदेवः सीममान्न्दितो भवति। यतोहि तस्य कन्या पुनः महाशक्तिमता जगतः सर्वाधिकगुणसम्पन्नेन पूर्णस्वरूपेण नारायणेन सह विवाहबन्धनेन आबद्धा भविष्यति। इदं नाटकम् अन्ते एकेन परिशिष्टेन सह परिसमाप्यते। अन्ते भरतवाक्यं वर्तते यत्र कविः मानवजातेः सुखकल्याणाद्यर्थं उन्नत्यै च संप्रार्थयते।

वेङ्कामात्यनाटके बहूसंख्यकानि पात्राणि उपस्थापितानि। नाटकस्य कथावस्तूनाम् अधिकः भागः पुराणादिभ्यः स्वीकृतो वर्तते, केचन अंशाश्च स्वयं तत्र संयोजिताः। नायक-नायिकयोः चरित्रं देवानां दिक्पालानां च चरित्राणि भारतीयपुराणग्रन्थेभ्यः स्वीकृतानि। कानिचन चरित्राणि यथा द्वौ गन्धर्वौ, मल्लिकाशेखरः, कुवलयानन्दः, द्वारपालः, मनोरञ्जनी, कविः विदूषकश्चेत्येतानि पात्राणि नाट्यकारस्य स्वात्मसर्जनम्। नाटकस्य नायकः प्रभुः माधवः लोकिकवीरत्वेन विश्वस्य सर्वाधिकशक्तिमत्त्वेन सर्वोत्कृष्टत्वेन सर्वगुणसम्पन्नत्वेन च उपस्थापितः। नायकप्रकारेषु तस्य शान्तत्वस्थितिशीलत्वगुणोपेतत्वात् इति धीरोदात्तनायकस्य विलक्षणमुदाहरणमिदं भवति। नायकस्येतस्य गुणस्य प्रकाशनार्थं कविः तेन सह तस्य सहकारिणः वैनतेयस्य एकं वैपरीत्यप्रदर्शकं दृश्यं ससर्ज। तत्र दर्श्यते यद्वैणतेयः क्रुद्धः सन् माधवं प्रति न्यगददस्माभिः रमा वरुणप्रासादाद्बलपूर्वकमपहरणीया इति। किन्तु तदा माधवः स्मितहास्यवदनः तद्वचः अनङ्गीकृत्य उवाद - एतादृशपरिकल्पनं दण्डो वा तदैव आश्रयणीयं यदा अन्ये उपायाः व्यर्थाः स्युः इति। नायिका रमा च आदर्शभूता

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

सुन्दरी नम्रा भारतीयपत्नी। माधवं प्रति तस्य प्रेम दृढं वर्तते। वैनतेयनारदयोश्च चरित्रं विशेषरूपेण उपस्थापितम् अस्ति। तथाहि प्रथमः वैनतेयः शक्तिशाली तथा आवेगवान् जनः। पङ्क्तान्तरे नारदः तु विविधकार्येषु प्रेरणादायकः भवति। नारदः एव तमसूयत् यत् वरुणः रमायाः विवार्थं स्वयम्वरसभायं आयोजितवान्। रमा च तस्मिन् माधवे अत्यन्तगभीरतया प्रेमाबद्धा वर्तते इति। वरुणश्च एकः स्नेहवान्पिता, गृहकर्ता, दायित्वशीलः पुरुषः इत्येवं रूपेण व्यवस्थितः। तस्य सर्वाधिकः आनन्दस्तु तदा भवति यदा रमामाधवयोः विवाहः भवति। सः एकः गर्वितः जनः यः स्वस्य दुहितृपतेः सार्विकोन्नतिं कामयते, सः अस्य महाविश्वस्य सर्वाधिकशक्तिमान् पुरुषः भवतु इति तस्य मनीषा। नूतनेषु कविसृष्टपात्रेषु नटी एका आदर्शगृहिणीरूपेण उपस्थापिता। या च तस्याः कन्यायाः कृते एकस्य योग्यस्य पात्रस्य अन्वेषणं करोति। कुवलयानन्दचरित्रं मल्लिकाशेखरचरित्रञ्च प्राणवन्ततया तथ्यपूर्णचरित्ररूपेण चित्रितं वर्तते। प्रतिहारी चेह दायित्वशीलरूपेण व्यवसायबुद्धियुक्ततया च उपस्थापितः अस्ति। कञ्चुकी चात्र विश्वस्तसेवकरूपेण व्यवस्थापिता। विदूषकः सृजनशीलः हास्यरसात्मकश्च पुरुषः आसीत् इति नाट्यते। मनोरञ्जनीचरित्रञ्च अत्र प्राणवन्तरूपेण बुद्धिमतीरूपेण च चित्रितम्। मल्लिकाचूडः कुवलयापीडः इति कवौ सन्तुष्टौ प्राणवन्तौ इति प्रदर्शितम्।

यथा एकस्मिन् समवाकारे अपेक्षितं वीरत्वप्रदर्शनादिर्भवति मुख्यमङ्गम्। तदिहाप्यस्ति लक्ष्मीस्वयम्वरस्य मुख्यः रसः तावद्वीररसः इति। भगवन्माधवः दैत्यानां रमापहरणप्रचेष्टां व्यर्थां कृत्वा तेषां प्रतारणाकौशलं स्तब्धीचकार तस्य वीरत्वमर्यादादिगुणैः सः आत्मानं अन्यान्यदेवेभ्यः विशिष्टरूपेण प्रकाशयति। अपि च प्रमाण्यते सः अन्येभ्यः देवेभ्यः अधिकक्षमतावान् येन अन्ये तस्य वैरित्वम् अपि न सहन्ते। अपि तु सः तेषु सर्वेषु देवेषु स्वानुग्रहं वर्षति। एवञ्च भगवान् माधवेन वरुणदेवस्य अभीष्टः पूरितः। तेन ऐप्यत यत्तस्य कन्यया सह विश्वस्य सर्वाधिकश्रेष्ठः कश्चित् विवाहं कुर्यात् -

"यश्च लोकैकवीरः स्याद्यः कल्याणगुणाकरः।
स एवास्यास्तु भर्तेति सागरेन्द्रेण संश्रुतम्"[8]॥

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

एवञ्च तत्र वरुणदेवेन आयोजितायां स्वयम्वरसभायां तत्कन्यायाः परिणयार्थं देवानां दैत्यानां च सामर्थ्यमपरीक्ष्यत। प्रभोः माधवस्य अतुलनीयं श्रेष्ठत्वं च तत्र प्रतिष्ठितं भवति।

अत्र विप्रलम्भशृङ्गारः, हास्यरसः इति अन्यौ द्वौ रसौ मुख्यस्य वीररसस्य अङ्गत्वेन व्यवस्थापितौ वर्तेते। वस्तुतः यदा प्रथमवारं माधवः मञ्चगतः दृश्यते तदा तस्य तत्र प्रेमपूर्णभावेन प्राकट्यमभूदिति दृश्यते। दुर्भाग्यवशीद्रमया सह तस्य प्रणयकलहः अभवत्। अतश्च सः तस्य प्रियायाः पत्न्याः विच्छन्नतया स्थातुं विवशः आसीत्। विच्छेदवेदनया माधववत् रमा अपि लब्धबहुकष्टा बभूव। तयापि यथाशीघ्रं स्वपतिना सह मेलनम् इष्टम्। परञ्च तया स्वयम्वरे माधवे आलोकिते तस्मिन्नेव वरत्वेन स्वीकृते तस्याः स्वस्तिश्वासवायुः प्रशान्तिमलभत। रमायाः स्वप्रेमिकविच्छेददुःखं स्वयम्वरे माधवं दृष्ट्वा शान्तमभूत्। एवञ्च सा तदा अग्रे गन्तुं अन्यान् वरान् द्रष्टुं साक्षात्कर्तुं वा नैच्छत्।

नाटके चित्रितः अपरः अङ्गीभूतः रसः हास्यरसः। अयं हि काव्ये इत्थं चित्रितः येन नायकस्य वीरत्वपूर्णगुणाः प्रकाशयितुं शक्यन्ते। नाटके हास्यरसस्य व्यवस्थापनार्थं मुख्यतः विदूषकः, रमायाः मित्रं मनोरञ्जनी इति पात्रद्वयं मुख्यतः चित्रितं वर्तते। विवाहदिवसे रमां प्रति कृतानि मन्तव्यानि दर्शकेषु हास्यस्य प्रभावम् उद्भावयति। तस्याः भारतं प्रति "हिरण्यकशिपुना पराजितः" इदं सम्बोधनं, अग्निदेवं प्रति "देवानां कृते खाद्यवहनं कृत्वा क्लान्तः" इत्यादिसम्बोधनञ्च अत्यन्तम् आस्वादयोग्यं भवति। विदूषकः अपि तीक्ष्णबुद्धिमान् जनः। तेन विवाहमहले उपस्थाय "ये च देवैः बहुवारं पराजिताः वीराः"- इत्येवं दैत्यानां कृते कटुवचनानि प्रोक्तः। एवम् एताभ्यामुभाभ्यान्तयोः आचरणेन पर्यवेक्षणादिभिः च नाटकं प्राणवन्तं चकार।

वेङ्कामात्यस्य लक्ष्मीस्वयम्वरः एकः आदर्शः समवकारः। अस्मिन् नाटके विविधविषयाः विविधचिन्तनानि च विक्षिप्ततया चित्रितानि सन्ति। अपि च पाठकस्य दर्शकस्य वा कर्तव्यमिदं यत् तैरेतान् विषयान्मनसि एकत्र सुत्रीकृत्वा विशिष्टं सुसम्बद्धं तात्पर्यं ग्राह्यमिति। एवञ्च रमामाधवयोः विवहास्य तत्सम्बद्धविषयाणां सर्वेषां तथ्यानि तु विविधकथोपकथनमाध्यमेन दर्शकानां पुरस्तातदुपस्थाप्यन्ते। यथा कुवलयानन्द-मल्लिकाशेखरयोः संवादः,

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

वेणतेय-नारदसंवादः, विदूषक-वैतालिकासंवादः इत्यादिः। कदाचित् तु नेपथ्यवचनेषु उक्तविषयैः नाटकस्य कथावस्तुनः अवधारणमपि भवति। अस्मिन् नाटके बहुसंख्यकाः देवाः अंशग्रहणं चकार। तेषां सर्वेषां सन्तुष्टये तेषां कृते एकैकं फलमपि व्यवस्थिम्। तेषु देवेषु तु प्रधानपुरस्कारत्वेन रमायाः पाणिग्रहणरूपं फलं माधवेनैवालभ्यत। वरुणेन च स्वपुत्रीं माधवेन सह संयुक्तां दृष्ट्वा हर्षः अन्वभूयत। सूर्यचन्द्रमसौ च दीप्तिमयग्रहौ इत्याख्यां संप्राप्य हर्षं अनुभवतः। अन्ये देवाः च नायकस्य माधवस्य आशिषः लब्ध्वा हृष्टाः अभवन्। एवं सर्वैः स्वस्वानुगुणं फलं लब्धम् इत्युक्तम्।

समवकारनाटकानां रचनाशैल्याः अनमनीयताकारणतः एव प्रायः नाटके घटनापेक्षया तद्वर्णनादिषु एव अधिकं प्राधान्यं लक्ष्यते। अयं हि स्पष्टः इष्टः दोषः अस्य नाट्यकाव्यस्य शोभारूपः इति भावयामः। यद्यपि अस्य नाटकस्य मुख्यरसः वीररसः अथापि क्वचित् शृङ्गाररसस्यैव वीररसापेक्षया प्राधान्यं परिलक्ष्यते। नाटकस्य नियमानुसारं नायकोचितं दृश्यं नाटके भवेत् किन्तु दर्शकैस्तु अस्मिन्नाटके तदपेक्षया रमामाधवयोः प्रेममयावस्थायाः एव साक्षिणः भवन्ति इति अयम् अपि अस्य नाटकस्य दोष एव इति वक्तुं शक्यते।

किन्तु नाटके विद्यमानानि प्रशंसनीयानि वैशिष्ट्यानि तु तद्गतदोषापेक्षया बहु अधिकानि भवन्ति। अत्र प्रधानं तथा विशिष्टम् अस्ति कवेः कल्पनाशक्तिः प्रतिभाख्या। यतोहि तत्सामर्थ्यादेव सः कविः पौराणिकीम् कथामिमां विशिष्टरूपेण उपस्थापितुं समर्थोऽभवत्। ऐतिह्यानुसारं लक्ष्मीनारायणयोः सम्बन्धः नित्यः अविच्छेद्यश्च भवति। किन्तु तथापि तयोरेव पुनः स्वयम्वरः भवति इति यदि श्रूयते तदा तत्तु पाठकस्य मनश्चकासितुमलं भवति। लेखकः स्वचातुर्येण अस्याः समस्यायाः समाधानमदात्। सः एवं समाधत्तेः तयोः रमामाधवयोः प्रणयकलहः अभवत्प्रेमिकप्रेमिकयोः मध्ये यथा भवति तद्वत् कलहः जातः, येन तौ आपाततः पृथक् रूपेण आस्ताम्। लक्ष्मी तस्य पितृगृहं वरुणगृहं प्रति गतवती इत्यर्थः। अतः वरुणः तयोः पुनर्मेलनार्थं स्वयम्वरसभायाः आयोजनं कृतवान्। येन च सः अन्ये देवाः च सन्तुष्टाः। एवं तयोः इदानीं पुनर्मेलनं भवति इति प्रसङ्गस्य समन्वयः भवति-

"जितस्तत्ताद्दग्यो विरहपरितापो मदनज-

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

स्त्रिलो कीवीरत्वं दनुजविजयैःख्यापितमभूत्।

सुखं लब्धा दुग्धाम्बुधितनुभवा च स्वयमियं

परित्यक्तो दूरं प्रणयकलहश्चापि युवयोः"[9]॥

नाट्यकारस्य कल्पनाशक्तेः अपरं वैशिष्ट्यं तावत् क्षुद्रचरित्राणां सर्जनम्। मल्लिकाशेखरः, कुवलयानन्दः, मनोरञ्जनी, विदूषकः, वैतालिकः, मल्लिकाचूडः, कुवलयापीडः इत्येतानि चरित्राणि कवेः आश्चर्यसृष्टिः। पौराणाकानि एतानि चरित्राणि अत्र जीवितरूपेण उपस्थापितानि। तेषां व्यक्तित्वं च स्पष्टरूपेण प्रदर्शितम् अस्ति। यथा वरुणस्य गाम्भीर्यं, यमस्य निष्ठुरता, नारदस्य संगीतं, वैनतेयस्य भक्तिः इत्येतानि वैशिष्ट्यानि अपि अत्यन्तं सुन्दरतया चित्रितानि। शिवगणेशकुवेरादीनाम् अपि अत्यन्तं चमत्काररूपेण प्रतीकृतिः प्रदत्ता। अपि च पुनः पुनः विविधोपायेन वर्णनेन माधवस्य अपराजेयत्वं महाशक्तिशालित्वं रमायाः तीव्रं प्रेम अत्यन्तं गभीररूपेणोपात्तम्। किञ्च अत्र स्वयम्वरदृश्यस्य उपस्थापनाप्रसङ्गे कवौ महाकविकालिदासस्य रघुवंशकाव्यगतस्य स्वयंवरवर्णनस्य अनुप्रेरणा स्पष्टं प्रतीयते। तत्र महाकविः कालिदासः अत्यन्तं रमणीयतया इन्दुमत्याः इतरराजकुमारेभ्यः अजस्य चयनमवर्णयत्।

अनेन वेङ्कामात्येन नाट्यकारेण नाट्यप्रकारभेदानां वर्णनार्थं प्रत्येकं नाटकविधां वर्णयितुं पृथक् पृथक् नाट्यम् उदाहरणत्वेन विरच्यत येन नाट्यकारस्य कल्पनाशक्तेः सामर्थ्यं पुनः विभ्राजते। अत्र प्रदर्शितं नाटकं तावत् समवकाराख्यस्य नाट्यभेदस्य उदाहरणम्। अपि च कामविलासः इति भाणाख्यस्य नाटकस्य उदाहरणम्, वीरराघवम् इति व्यायोगाख्यस्य नाट्यभेदस्य उदाहरणम्। एतदतिरिच्य वेङ्कामात्यस्य प्रत्येकं रचनाः तत्कालीनसमाजव्यवस्थाभिः सह अस्मान् परिचाययन्ति। एतस्मात् लक्ष्मीस्वयम्वरनाटकादस्माभिरेतत् अवगन्तुं शक्यते यत्तस्मिन्काले विविधप्रतिभाशालिनः समाजे अत्यन्तं सम्मानभाजः अविद्यन्त। अपि च उत्सवकाले नाट्यादिमनोरञ्जकविषयाः व्यवस्थाप्यन्ते स्म।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

एतस्मिन् नाटके वेङ्कामात्यस्य रचनाशैल्याः प्रशंसनम् अपि अत्यन्तं प्रासङ्गिकमेव। वस्तुतस्तु तस्य प्राकृतभाषायाः प्रयोगशैली यद्यपि अत्यन्तं सरला अथापि तत्त्वगम्भीरा एव। एवमेव तस्य संस्कृतभाषायां दक्षता अपि अत्यन्तं गभीरा वर्तते। तेन सुस्पष्टरूपेण यथायथं स्वमतं प्रकाशयता अपि पाणिनीयव्याकरणनियमाः अपि नोलङ्घयन्ते। अस्मिन्नाटके विक्षिप्ततया विविधछन्दोभिः विविधानि स्तवकानि विराजन्ते। यद्यपि कविना तस्य रचनायां शार्दूलविक्रीडितछन्दसः तथा स्रग्धराछन्दसः एव प्राधान्येन उपयोगः विहितः। अस्मिन् नाटके तथा बहुनि विशिष्टार्थयुक्तानि वाक्यानि विलसन्ति यानि अस्य नाटकस्य गाम्भीर्यं वर्धयन्ति। तद्यथा- अयमेव महतां पन्था यैः उष्कर्षाः प्रीयन्ते इत्यादिः।

लक्ष्मीस्वयम्वरनाटकस्य उपसंहारभागः तस्य प्रस्तावनावत् आकर्षणीयः वर्तते। यतोहि प्रस्तावनायां रमामाधवयोः प्रेम विवाहादिप्रसङ्गः प्रस्तुतः तथा च उपसंहारभागः नाट्यकारस्य ज्ञानं नाट्यशैली मानविकता इत्यादिविषये अस्माकं श्रद्धाभावः प्रकाश्यते। न हि सर्वेषां कवीनाम् एवं रूपेण साहित्यस्य, समाजस्य तथा मानवजातेः सुखस्य अग्रगतिविषये स्पष्टतया स्वकाव्ये सोत्साहं गातुं सामर्थ्यं विद्यते। अग्रिमप्रजन्मगतैः अस्माभिः वेङ्कामात्यस्य नाटकं कार्तज्ञेन सह स्मर्तव्यं भवति। तथाहि भरतवाक्यम्-

"साहत्यसम्पदभिवृद्धिमुपात्तलोकाः

सर्वान् बुधान् सुखयतु क्षपिपान्तरायाः"[10]॥

मानवाः दुःखान्मुक्ताः भवन्तु, साहित्यैः समृद्धाः सुखिनश्च भूत्वा जीवनयापनं कुर्वन्तु" -इति।

Endnotes

I. History of Mysore' - Vol. II - 1946. Edited by C. Hayavadana Rao, pp.478

II. तत्रैव

III. वेंकामात्यस्य लक्ष्मीस्वयंवरसमवकारः MSS. 'Ka', p.96/a.

IV. M. Krishnamachariar, 'Classical Sanskrit Literature" - 1937, p.705.

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

V. वेंकामात्यस्य लक्ष्मीस्वयंवरसमवकारः MSS. 'Ka', p.96-98.

VI. History of Mysore, Vol.II, Ed. by C. Hayavadana Rao.

VII. तत्रैव

VIII. लक्ष्मीस्वयंवरसमवकारः 1/42

IX. लक्ष्मीस्वयंवरसमवकारः 3/39

X. लक्ष्मीस्वयंवरसमवकारः 3/45

सन्दर्भग्रन्थसूची

- Krishnamachariar, M. (1967). *Classical Sanskrit Literature.* Madras: Tirumalai- Tirupati Devasthanams
- वेंकामात्यः. (n.d.). *लक्ष्मीस्वयंवरसमवकारः MSS.* Mysore: Oriental Research Institute.